31. –4 Dilated, expanded. –5 Manifested, displayed. –6 Evident, apparent, manifest.

**विस्फुरित** *p. p.* 1 Tremulous, quivering. –2 Swollen, enlarged. –3 Flashing, glittering; एकोऽपि विस्फुरितमण्डलचापचक्रम् Ve. 2. 26.

**विस्फु(स्फू)र्ज्** 1 P. 1 To roar, thunder. –2 To resound. –3 To increase. –4 To shine, appear; अस्त्येवं जडधामता तु भवतो यद् व्योम्नि विस्फूर्जसे K. P. 10. 444.

**विस्फूर्जः** Roaring, thundering.

**विस्फूर्जथुः** 1 Roaring, thundering, rumbling. –2 A clap or peal of thunder. –3 (Hence) A thunderlike manifestation or rise, any sudden appearance or stroke; ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः R. 14. 62. –4 Rolling. (as of waves); swell, surging appearance; महोर्मिविस्फूर्जथुनिर्विशेषाः R. 13. 12.

**विस्फूर्जितम्** 1 Roar, shout; क्व च विक्रान्तता याता क्व च विस्फूर्जितं महत् Mb. 9. 31. 33. –2 Rolling. –3 Fruit, result; तत् सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् Bh. 2. 125; 3. 143; त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् Śiva-mahimna 11. –3 The impetuous motion (of wind); धाराणां च निपातेन वायोर्विस्फूर्जितेन च Mb. 3. 171. 6. –4 Knitting, contraction (of the brows); विश्वं विध्वंसयन् वीर्यशौर्यविस्फूर्जितभ्रुवा Bhāg. 4. 24. 57.

**विस्फुलिङ्गः** 1 A spark of fire; यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति Bṛi. Up. 2. 1. 20; अग्नेर्ज्वलतो विस्फुलिङ्गा विप्रतिष्ठेरन् Ś. B. –2 A kind of poison.

**विस्फोटः, –टा** 1 A boil, pimple, tumour. –2 Small-pox. –3 Cracking, crashing; Mb.

**विस्फोटकः** 1 A blister, boil; (also विस्फोटिका). –2 A kind of leprosy. –3 Small-pox.

**विस्फोटनम्** 1 The appearance of blisters. –2 Loud roaring.

**विस्मि** 1 Ā. 1 To wonder or be surprised at; उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये R. 15. 68; उद्वीक्ष्य कों भुवि न विस्मयते नगेशम् Śi. 4. 19; Bk. 5. 51. –2 To admire. –3 To be proud or conceited; न विस्मयेत तपसा Ms. 4. 236. –*Caus.* To cause to smile, cause to be surprised, fill with wonder or astonishment; विस्मापयन् विस्मितमात्मवृत्तौ R. 2. 33; Bk. 5. 58; 8. 42.

**विस्मयः** 1 Wonder, surprise, astonishment, amazement; पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् R. 10. 50. –2 Astonishment or wonder, being the feeling which produces the *adbhuta* sentiment; S. D. thus defines it:- विविधेषु पदार्थेषु लोकसीमातिवर्तिषु । विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ॥ 207. –3 Pride, arrogance; तपः क्षरति विस्मयात् Ms. 4. 237. –4 Uncertainty, doubt. **–Comp. –आकुल, –आविष्ट** *a.* astonished, struck with wonder. **–पदम्** a matter of astonishment; मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् Śiva-mahimna 3.

**विस्मयंकर, –विस्मयंगम** *a.* Astonishing, producing wonder.

**विस्मयनम्** Astonishment, wonder.

**विस्मापन** *a.* (**–नी** *f.*) Astonishing; येन मेऽपहृतं तेजो देवविस्मापनं महत् Bhāg. 1. 15. 5. **–नः** 1 The god of love. –2 Trick, deceit, illusion. **–नम्** 1 Causing wonder. –2 Anything causing wonder. –3 A city of the Gandharvas (said to be *m.* also).

**विस्मित** *p. p.* 1 Astonished, surprised, amazed, wonder-struck. –2 Disconcerted. –3 Proud; दृप्तं संख्ये द्विपबलाढ्यसा चापि विस्मितम् Mb. 7. 27. 8.

**विस्मितिः** *f.* Astonishment, wonder, surprise.

**विस्मेर** *a.* Surprised, struck with wonder, astonished.

**विस्मृ** 1 P. To forget; मधुकर विस्मृतोऽस्येनां कथम् Ś. 5. 1; यदा तु अन्यसङ्गात् पूर्ववृत्तं विस्मृतो भवान् Ś. 6. –*Caus.* To cause to forget; अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति V. 3. 18.

**विस्मरणम्** Forgetting, forgetfulness, oblivion; मय्येव विस्मरणदारुणचित्तवृत्तौ Ś. 5. 23.

**विस्मृत** *p. p.* Forgotten.

**विस्मृतिः** *f.* Forgetfulness, oblivion, loss of memory.

**विस्रम्** A smell like that of raw meat. –*a.* Stinking of; (शिखिशिखाश्रेणयः) अजस्रस्रुतबहलवसावासविस्रे स्वनन्ति Nāg. 4. 18; N. 22. 50. **–Comp. –गन्ध, गन्धि, गन्धिन्** *a.* raw smelling; रुधिरवसाविस्रगन्धिः कुठारः A. R. 4. 25; जानुक विस्रगंधी गोधादी मत्स्यबन्धः एव निःसंशयम् Ś. 6. **–गन्धिः** yellow orpiment.

**विस्रंस्** 1 Ā. 1 To slip down, become loosened. –2 To fall down, drop, slip. –*Caus.* 1 To cause to fall down, let fall; विस्रंसयन्ती नवकर्णिकारम् Ku. 3. 62. –2 To loosen, relax, slacken. –3 To betray.

**विस्रंसः, –सा** 1 Falling down. –2 Decay, laxness, weakness, debility.

**विस्रंसन** *a.* 1 Causing to fall or drop down; अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसनः Gīt. 3. –2 Untying, loosening; नीविविस्रंसनः करः K. P. 7. **–नम्** 1 Falling down. –2 Flowing, dropping. –3 Untying, loosening. –4 A laxative, purgative.

**विस्रस्त** *p. p.* 1 Loosened. –2 Weak, infirm. **–Comp. –चेतस्** *a.* one whose spirit is dejected.

**विस्रस्, विस्रसा** Decay, debility, decrepitude; इह चेदशकद् बोद्धुं प्राक् शरीरस्य विस्रसः Kaṭh. 6. 4.

**विस्रब्ध, विस्रम्भ** See विश्रब्ध, विश्रम्भ. **–विस्रब्धम्** *ind* Confidently, without reserve; विस्रब्धं ब्राह्मणः शूद्राद् द्रव्योपादानमाचरेत् Ms. 8. 417.